International Journal of Sanskrit Research 2021; 7(1): 484-485

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 484-485
© 2021 IJSR
[www.anantaajournal.com](http://www.anantaajournal.com)
Received: 16-10-2020
Accepted: 05-11-2020

**प्रियंका**
स्नातकोत्तर, राजकीय महाविद्यालय
हिसार, हरियाणा, भारत

**Corresponding Author:**
**प्रियंका**
स्नातकोत्तर, राजकीय महाविद्यालय
हिसार, हरियाणा, भारत

# हकारविसर्गयो : कः भेदः

## प्रियंका

**प्रस्तावना**

संस्कृतज्ञाः सन्ति एव बहवः। किन्तु वर्णोच्चारणविषये यदा प्रश्नः भवति तदा समुचितोत्तरदाने क्लेशम् अनुभवन्ति ते सर्वे अपि। 'ह' कार विसर्गयोः कः भेदः? मकारानुस्वारयोः भेदः कः इत्यादयः प्रश्नाः असकृत् सम्मुखीकरणीयाः भवन्ति। ''अकुहविसर्जनीयां कण्ठः'' इत्यादीनां कौमुदीस्थपकङीनाम् अवगमनमात्रेण, विवरणमात्रेण ग पूर्वोक्तानां प्रश्नानाम् उत्तरं दातुं न शक्यते। अतएव इह लेखे हकारविसर्गयोः भेदविषये किञ्चित् उच्यते। तयोः भेदस्य अवगमनाय अन्ये केचन प्राथमिकाः अंशा अपि अवश्य भेव ज्ञातव्याः।

आदौ विसर्गस्य विषये शिक्षाग्रन्थेष्थु उक्तं विवरणं पश्यामः। विसर्गः 'अयोगवाह' शब्देन निर्दिश्यते। विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयः, अनुवारः, यमःइत्येते अयोगवाहाः। एते 'आश्रयस्थानभागिनः' इति उच्यन्ते। यान् आश्रित्य ये तिष्ठन्ति तदेव तेषां स्थानम् इति तात्पर्यम्। तथा हि पाणिनीयशिक्षा–

अनुस्वारयमाना च नासिका स्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः।।२३।।[1]

आश्रयस्थानभागित्वात् एव विसर्गस्य सर्वत्रापि समानम् उच्चारणं न भवति। विसर्गः इति शब्दः एव एतम् अर्थं ज्ञापयति। विविधरूपेण मिसर्जनीयः उच्चारणीयः इति विसर्गः। पूर्वस्वरश्रुतेः ये विशेषधर्माः ते एव भवन्ति विसर्गस्यापि।।

विसर्गोच्चारण विषये माध्यान्दिन शिक्षा वदति–
देवा वः सविता चात्र हकारसदृशो भवेत्।।
देवीस्तिस्त्रो विसर्गस्तु हिकारसदृशो भवेत्।।
आखुस्ते पशुरित्यादौ हुकारसदृशो भवेत्।।
विसर्गश्चाग्नेरित्यादौ हेकारसदृशो भवेत्।।
विसर्गो बाह्मोरित्यादौ होकारसदृशो भवेत्।।
अथ स्वैर्द्दक्षैरित्यादौ हिकारसदृशो भवेत्।।
विसर्गो द्यौष्पितेत्यादौ हुकारसदृशो भवेत्।।
हकारो नैव मन्तव्य इति शास्त्रव्ययस्थितिः।
फणिनिः श्वाससदृशो विसर्गो भवति ध्रुवर्म्।। १०–२२।।[2]

एतेषु श्लोकेषु 'हकारसदृशः' 'हिकारसदृशः' 'हुकारसदृशः' इत्यादिकम् उक्त्वा अन्ते 'हकारो नैव मन्तव्यः' इति स्पष्टतया उक्तम्। तस्मात् स्पष्टं यत् विसर्गस्य उच्चारणं हकारोच्चारणात् भिद्यते एव इति। स च भेदः कः इति पश्याम तावत्।

आदौ अगङानां परिचयं प्राप्नुयाम। नासिका आस्यं कष्ठ, उरः चेति चत्वारः स्थूलविभागाः। आस्यं नाम अत्र कण्ठात् ऊर्ध्वं नासिकावर्जं यः वर्णोत्पत्तिकारणीभूत प्रदेशः तद्वाचकः।

अस्माभिः अन्तः स्वीकृतः श्वासः श्वासनलिका द्वारा फुप्फुसं प्रविशति। ततः एव अशुद्धं वायुः श्वासनलिका द्वारा निर्गच्छति। श्वासनलिकापार्श्वे एव अभनलिका अपि भवति। तयोः मध्ये तनुः पटलः भवति। आहारस्वीकारावसरे सः श्वासनलिकां श्वासोच्छ्रासस्मये वर्णोच्चारणसमये च अभनलिकां च पिदधाति। फुप्फुसात् बर्हिर्निर्गच्छान् वायुः एव विभिन्नेषु स्थानेषु विकृतिं प्राप्य वर्णान् उच्चारयति। प्यम् अन्तः स्वकुर्मः सः शुद्धः वायुः न वर्णोतिपत्ति प्रयोजकः इति तात्पर्यम्।

श्वासनलिकाद्वारा आगतः वायुः प्रमुखं प्रथमं च यत्र परिष्कारं प्राप्नोति। तदेव 'ध्वनियन्त्रम्' इति उच्यते। तत्र द्वौ स्नायू भवतः। 'घोषतन्त्रयौ इति तयोः निर्देशः भवितुम् अर्हति। (एते तन्त्रयौ प्रायः ओष्ठकारे भवतः। श्वासविकासावसरे ते अन्योन्यासंसक्ते भवतः। स्वरयन्त्रमुखं च अतिविस्तृतं भवति। एतदाव स्थां न कोऽपि वर्णः उत्पद्यते। घोषतन्त्रयोः पिधान–स्थितिः, दूरस्थितिः, सामीप्यं, कठोरता, शैथिल्यं, सकम्पता, कम्पराहित्यम् इत्यादयः अवस्थाः विविधान् वर्णान् सृजन्ति।

घोष तन्त्रयोः दैर्ध्यं प्रारूः पुरुषेषु ३/५ पादात्मकं, महिलासु १/२ पादात्मकं च भवति शिथिलतादशायामं। तदेव कार्यदशायां क्रमेण एकपादात्मकं ३/५ पादात्मकं च भवति पुरुषमहिलयोः। सम्भाषणावसरे अनयोः स्पन्दाः पुरुषेषु प्रतिपलं २१८–३२६ स्पन्दाः सम्भवन्ति। संगीतज्ञादीनां घोषतन्त्रयोः स्पन्दः अधिकः भवितुम् अर्हति। एकैकस्य अपि वर्णस्य उच्चारणस्य अनन्तरम् अनयोः घोषतन्त्रयोः पिधानं भवति, अचिरात् एव पुनः उद्घाटनं भवति च। पुनः उद्घाटनं भवति च। नैरन्तर्येण उद्घाटन् पिधाने प्रवर्तते इत्यतः तरङंगरूपः कम्पनधर्मः कश्चन आहितः भवति।

स एव घोषः इति उच्यते। घोष–विशिष्टः यः ध्वनिः कण्ठे उत्पद्यते रतस्य नाम 'नादः' इति। घोषतन्त्रयोः घोषजनकः संकोचन प्रयत्न5 'संवारः' इति उच्यते। एवते त्रयः अपि युगपदेव सम्भवन्ति घोषतन्त्रयौ यदा विवृते भवतः (सवृते न भवतः) तदा वर्णेषु घोषः न उत्पद्यते। अधोषेण विशिष्टः ध्वनिः श्वासः इति अस्य अयं नार्थ यत् तत्र श्वासः एव भवति, न तु नादः इति। नादं विना वायुमात्रेण न कोऽपि वर्ण उत्पद्यते। अतः यत्र श्वासादिव्यवहारः। विवार अघोष श्वासाः अपि युगपदेव सम्भवन्ति। एते एव षट् बाह्यप्रयत्नत्वेन निर्दिश्यन्ते।

हकारविसर्गयोः भेदस्य अवगमनमात्राय वयम् उद्यताः इत्यतः तावन्मात्रसम्बद्धाः विषया एवं अत्र चर्च्यन्ते न इतरे। तदर्थ श्वासघोषयोः अवगमनं पर्याप्तम्। विसर्गः सरसम्बन्धी इत्यतः स्वरसम्बंद्धा विषयाः केचन अत्र विव्रियन्ते। वस्तुतः स्वरोच्चारणावसरे कस्यापि स्थानस्य स्पर्शः न भवति। तथापि यत्र करणस्य उपसंहार–तदेव स्वराणां यत्रोपसंहारः तत् स्थान् तथा हि तैत्तिरीयप्रतिशाख्यम्

स्वराणां यत्रोपसंहारः तत् स्थानम्। 'अन्येषां यत्र स्पर्शनम्' इति। स्वराणाम् उच्चारणे जिह्वग्रादीनां करणानां यत्र उपसंहार (सन्निकृष्टता) तत् स्थानम्। व्यञ्जनानाम् उच्चारणे तु यत्र देशे स्पर्शः तत् स्थानम् इति तात्पर्यम्।

''यत्र स्पर्शः तदेव स्थानम्'' इति मते तु स्वराणां स्थानं न भवति इत्येव वस्तुम उचितम्। तथापि कौमुधादिषु उक्तम् इत्यतः अत्रापि स्थानानि दर्शितानि। कस्यचिदपि स्वरस्य उच्चारणावसरे स्थानस्य स्पर्शः न दर्शितानि भवति। कस्यचि इत्येतत् स्वरोच्चारण सम्बद्धेषु चित्रेषु स्पष्टतया द्रष्टुं शक्यम्।

अ– कण्ठः इ–तालु उ–ओष्ठौ ऋ–मूर्धा ए.ऐ–कण्ठतालु ओ–औ–कष्ठोष्ठम्।[3]

एतावत् विवरणं तु लघुकौमुद्यादिषु उपलभ्यते एव। किन्तु स्थान विवरणज्ञान मात्रेण उच्चारणव्यवस्था पूर्णतः ज्ञाता न भवेत्। जिह्व, हनुः, ओष्ठौ इत्येतेषां विन्यासः अपि अत्र सम्बद्धः भवति।

## संदर्भ ग्रंथ सूची


1. पाणिनीयशिक्षा – श्लोक 23
2. माध्यन्दिन शिक्षा – श्लोक 18–22
3. लघु सिद्धान्त कौमुदी – सूत्रसंख्या 10